# पुनरावृत्तिः

नवमकक्षायाम् अस्माभिः संस्कृतवर्णमालायाः उच्चारणस्थानानां सन्धीनां च विषये यत् पठितं तस्य पुनरावृत्तिं कुर्मः।

## संस्कृतवर्णमाला

**स्वराः** – येषां वर्णानाम् उच्चारणं स्वतन्त्रतया भवति ते स्वराः कथ्यन्ते। स्वराः त्रिविधाः सन्ति–

1) ह्रस्वस्वराः 2) दीर्घस्वराः 3) प्लुतस्वराः

अत्र वयं केवलं ह्रस्वस्वराणां दीर्घस्वराणां च अध्ययनं करिष्यामः।

| ह्रस्वस्वराः (एते एकमात्राकालेन उच्चार्यमाणाः भवन्ति।) | दीर्घस्वराः (एते द्विमात्राकालेन उच्चार्यमाणाः भवन्ति।) |
|---|---|
| अ | आ |
| इ | ई |
| उ | ऊ |
| ऋ | ॠ |
| लृ | – |
| | ए |
| | ऐ |
| | ओ |
| | औ |

**व्यञ्जनानि** – येषां वर्णानाम् उच्चारणं स्वतन्त्रतया न अपितु स्वराणां सहायतया एव भवति ते व्यञ्जनवर्णाः भवन्ति।

| वर्गीयव्यञ्जनानि | | अवर्गीयव्यञ्जनानि | |
|---|---|---|---|
| | | अन्तःस्थाः | उष्माणः |
| क ख ग घ ङ | | य | श |
| च छ ज झ ञ | | र | ष |
| ट ठ ड ढ ण | | ल | स |
| त थ द ध न | | व | ह |
| प फ ब भ म | | | |

**अयोगवाहौ** – (ं) अनुस्वारः (ः) विसर्गः

# वर्णानाम् उच्चारणस्थानानि

| वर्णानाम् उत्पत्तिस्थानम् | उच्चारिताः वर्णाः | | | | स्थानजन्यस्य वर्णस्य नाम |
|---|---|---|---|---|---|
| | स्वराः | वर्गीयव्यञ्जनानि | अवर्गीयव्यञ्जनानि | | |
| | | | अन्तस्थाः | ऊष्माणः | |
| **कण्ठः** अकुहविसर्जनीयानां कण्ठः | अ आ (:) | क ख ग घ | | ह | कण्ठ्यः |
| **तालु** इचुयशानां तालु | इ ई | च छ ज झ | य | श | तालव्यः |
| **मूर्धा** ऋटुरषाणां मूर्धा | ऋ ॠ | ट ठ ड ढ | र | ष | मूर्धन्यः |
| **दन्ताः** लृतुलसानां दन्ताः | लृ | त थ द ध | ल | स | दन्त्यः |
| **ओष्ठौ** उपूपध्मानीयानाम् ओष्ठौ | उ ऊ | प फ ब भ | | | ओष्ठ्यः |
| | कण्ठनासिकम् | ङ | | | कण्ठनासिक्यः |
| | तालुनासिकम् | ञ | | | तालुनासिक्यः |
| **नासिका** ञमङणनानां नासिका | मूर्धानासिकम् | ण | | | मूर्धानासिक्यः |
| | दन्तनासिकम् | न | | | दन्तनासिक्यः |
| | ओष्ठनासिकम् | म | | | ओष्ठनासिक्यः |
| **कण्ठतालु** एदैतोः कण्ठतालु | ए ऐ | | | | कण्ठतालव्यः |
| **कण्ठोष्ठम्** ओदौतोः कण्ठोष्ठम् | ओ औ | | | | कण्ठोष्ठ्यः |
| **दन्तोष्ठम्** वकारस्य दन्तोष्ठम् | व | | | | दन्तोष्ठ्यः |

# स्वरसन्धयः

भवद्भिः नवमकक्षायां विस्तृतरूपेण स्वर-व्यञ्जन-विसर्ग-सन्धयः पठिताः। अत्र तेषां सन्धीनाम् अभ्यासः करणीयः। प्रथमं स्वरसन्धेः पुनरावृत्तिं कुर्मः।

| पूर्ववर्णः | परवर्णः | विकारः | उदाहरणम् | | सन्धिनाम |
|---|---|---|---|---|---|
| | | | सन्धिच्छेदः | सन्धिः | |
| अ / आ | अ / आ | द्वयोः स्थाने आ | जल + आगमः | जलागमः | दीर्घः |
| इ / ई | इ / ई | द्वयोः स्थाने ई | कवि + इन्द्रः | कवीन्द्रः | |
| उ / ऊ | उ / ऊ | द्वयोः स्थाने ऊ | भानु + उदयः | भानूदयः | |
| ऋ / ॠ | ऋ / ॠ | द्वयोः स्थाने ॠ | मातृ + ऋणम् | मातॄणम् | |
| अ / आ | इ / ई | द्वयोः स्थाने ए | गज + इन्द्रः | गजेन्द्रः | गुणः |
| अ / आ | उ / ऊ | द्वयोः स्थाने ओ | चन्द्र + उदयः | चन्द्रोदयः | |
| अ / आ | ऋ / ॠ | द्वयोः स्थाने अर् | महा + ऋषिः | महर्षिः | |
| अ / आ | ए | द्वयोः स्थाने ऐ | जन + एकता | जनैकता | वृद्धिः |
| अ / आ | ऐ | द्वयोः स्थाने ऐ | महा + ऐश्वर्यम् | महैश्वर्यम् | |
| अ / आ | ओ | द्वयोः स्थाने औ | तव + ओदनम् | तवौदनम् | |
| अ / आ | औ | द्वयोः स्थाने औ | महा + औदार्यम् | महौदार्यम् | |
| इ / ई | भिन्नस्वरः | 'इ / ई' स्थाने य् | यदि + अपि | यद्यपि | यण् |
| उ / ऊ | | 'उ / ऊ' स्थाने व् | लघु + इदम् | लघ्विदम् | |
| ऋ / ॠ | | 'ऋ / ॠ' स्थाने र् | मातृ + आदेशः | मात्रादेशः | |
| ऌ | | 'ऌ' स्थाने ल् | ऌ + आकारः | लाकारः | |
| ए | स्वरः | 'ए' स्थाने अय् | चे + अनम् | चयनम् | अयादिः |
| ओ | | 'ओ' स्थाने अव् | पो + अनः | पवनः | |
| ऐ | | 'ऐ' स्थाने आय् | गै + अकः | गायकः | |
| औ | | 'औ' स्थाने आव् | उभौ + अत्र | उभावत्र | |

## अभ्यासः

❖ **अधोलिखिते अनुच्छेदे रेखाङ्कितस्थूलपदानां सन्धिः सन्धिच्छेदः वा क्रियताम् –**

एकदा **पाण्डवाग्रजः** ................ + ................ युधिष्ठिरः वने **पिपासा** + **आकुलः** .................................. अभवत्। सः नकुलं जलम् आनेतुम् आदिशत्। नकुलः अपि **तृषार्तः** ................ + ................ आसीत्। सः किञ्चिद् दूरं **गत्वा** + **एकं** .................................. तडागम् अपश्यत्। तडागस्य स्वामी यक्षः तं जलपानात् निवारयन् अवदत् – भोः! प्रथमं मम **प्रश्नस्य** + **उत्तरं** .................................. देहि। ततः जलं पिब। परं शक्ति-दर्पोन्मत्तः नकुलः जलम् अपिबत्। **पीत्वा** + **एव** .................................. मोहं गतः। पश्चात् अन्ये त्रयः भ्रातरः अपि क्रमशः **तत्र** + **आगताः** .................................. यक्षः प्रत्येकं जलपानात् निवारितवान्, किन्तु कोऽपि तद्वचनं **न** + **अमन्यत** .............................. जलपानेन सर्वेऽमुह्यन् अन्ते **युधिष्ठिरस्योत्तरैः** ................ + ................ यक्षः अतुष्यत्।

# व्यञ्जनसन्धयः

| पूर्ववर्णः | परवर्णः | विकारः | उदाहरणम् |
|---|---|---|---|
| पदान्त म् | व्यञ्जनानि | म् → ं | रामम् + वन्दे = रामं वन्दे |
| क् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ग् | वाक् + ईशः = वागीशः<br>वाक् + दानम् = वाग्दानम् |
| च् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ज् | अच् + अन्तः = अजन्तः<br>अच् + वर्णः = अज्वर्णः |
| ट् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ड् | सम्राट् + आगतः = सम्राडागतः<br>षट् + वादने = षड्वादने |
| त् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः द् | सत् + आचारः = सदाचारः<br>सत् + गुणाः = सद्गुणाः |
| प् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ब् | अप् + जम् = अब्जम्<br>सुप् + अन्तः = सुबन्तः |
| त् | च् | त् स्थाने च् | तत् + च = तच्च |
| त् | ज् | त् स्थाने ज् | तत् + जालम् = तज्जालम् |
| त् | ल् | त् स्थाने ल् | तत् + लीनम् = तल्लीनम् |
| र् | र् | र् लोपः, पूर्वस्वरस्य दीर्घत्वम् | निर् + रोगः = नीरोगः |
| ऋ,ॠ,र्,ष् | **सह्यव्यवधानम्**<br>स्वराः, ह्, य्, व्, कवर्गः, पवर्गः | | **विकारः**<br>न् → ण् |
| ऋ,ॠ,र्,ष् | **असह्यव्यवधानम्**<br>ल्, श्, स् चवर्गः, टवर्गः, तवर्गः | | **विकारः**<br>न् → न् |
| पदान्तं न् | | | न् → न् |

## अभ्यासः

❖ रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।

सुभाषितवचनानि नरं यथा **सद्विचारान्** .................... + .................... प्रति प्रेरयन्ति यथा **सत् + गुरुः** .................... स्वशिष्यं **यत् + उपदिशति** .................... शिष्यः **तच्चित्ते** .................... + .................... धारयति। सः उपदेशः **तत् + जीवनं** .................... **कल्याणमयम् + विदधाति** ....................। एवं सुभाषितानि पठित्वा मानवः **प्रेरणां लभते** .................... + ....................। **तच्चिते** .................... + .................... उत्साहस्य सञ्चारः भवति। तस्य शरीरं स्वस्थं **मनः + च** .................... **प्रसन्नताम् + विन्दति**। .................... ईदृशः मानवः **जगदीश्वरे** .................... + .................... विश्वासं करोति। स्वकर्तव्येषु **तत् + लीनः** .................... भूत्वा **जीवनलक्ष्यम् + साधयित्वा** .................... संसारे **कीर्तिम् + लभते** ....................।

# विसर्गसन्धयः

| विसर्गात् पूर्ववर्णः | विसर्गः | विसर्गात् परवर्णः | परिणामः | उदाहरणम् |
|---|---|---|---|---|
| यः कोऽपि वर्णः भवेत्। | : | क् / ख् | विकारः न भवति | कः कृन्तति। / शिशुः खेलति। |
| | : | प् / फ् | विकारः न भवति | बालः पठति। / तरुः फलति। |
| | : | श् / च् / छ् | विसर्गस्य स्थाने श् | हरिश्चलति / रामश्शेते। |
| | : | ष् / ट् / ठ् | विसर्गस्य स्थाने ष् | कष्टीकते / गजष्षष्ठः। |
| | : | स् / त् / थ् | विसर्गस्य स्थाने स् | विभुस्तरति / समीरस्सुप्तः। |
| अ | : | अ | विसर्गस्य स्थाने 'ओ' उत्तरवर्तिनः अकारस्य लोपः तत्स्थाने (ऽ) | बालः + अवदत् = बालोऽवदत् |
| अ | : | अकारं विहाय सर्वे स्वराः | विसर्गलोपः | बालः + आगच्छत् = बाल आगच्छत् |
| अ | : | वर्गाणां तृतीयः/चतुर्थः/ पञ्चमः वर्णः/ य्/र्/ल्/व्/ह् | विसर्गस्थाने 'ओ' | रामः + गच्छति = रामो गच्छति |
| आ | : | स्वराः/वर्गाणां तृतीयः/ चतुर्थः/पञ्चमः वर्णः/ य्/र्/ल्/व्/ह् | विसर्गलोपः | छात्राः + आगताः = छात्रा आगताः |
| अ-आ स्वरौ विहाय अन्ये स्वराः | : | स्वराः/वर्गाणां तृतीयः/ चतुर्थः/पञ्चमः वर्णः/ य्/र्/ल्/व्/ह् | विसर्गस्थाने 'र्' | शिशुः + हसति = शिशुर्हसति |
| स | : | ह्रस्वः अकारः | विसर्गस्थाने 'ओ' अकारस्य लोपः तत्स्थाने (ऽ) | सः + अहसत् = सोऽहसत् |
| एष | : | ह्रस्वः अकारः | विसर्गस्थाने 'ओ' अकारस्य लोपः तत्स्थाने (ऽ) | एषः + अक्रीडत् = एषोऽक्रीडत् |
| स | : | अकारं विहाय सर्वे वर्णाः | विसर्गलोपः | सः + वदति = स वदति |
| एष | : | अकारं विहाय सर्वे वर्णाः | विसर्गलोपः | एषः + आयाति = एष आयाति |

## अभ्यासः

❖ **अधोदत्ते अनुच्छेदे रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।**

क्रीडाणाम् उपयोगितां सर्वे स्वीकुर्वन्ति। **एताः + क्रीडाः** ...................... शरीरेण सह **मनोऽपि** ................. + ................. सबलं कुर्वन्ति। **एताभिः + परस्परं** .................... सद्भावस्य **वृद्धिर्जायते** ................ + ................। **मनः + रञ्जनं** ...................... तु भवति एव। **बालाः + अपि** ......................, **युवानोऽपि** ................. + ................. **वृद्धा अपि** ................. + ................. **लाभान्विताः + भवन्ति** ...................... अतः **सर्वैराजीवनं** ................. + ................. क्रीडाः क्रीडितुं शक्यन्ते। स्वरुचिम् आवश्यकतां च अनुसृत्य **क्रीडाः + चयनीयाः** ......................।

## प्रथमः अभ्यासः

# सन्धयः

### सन्धयः

| (क) स्वरसन्धयः | (ख) व्यञ्जनसन्धयः | (ग) विसर्गसन्धयः |
|---|---|---|
| वृद्धिः | जश्त्वम् | उत्वम् |
| यण् | परसवर्णः | रत्वम् |
| अयादिः | तुगागमः | लोपः |
| पूर्वरूपम् | छत्वम् | शत्वम् |
| | | षत्वम् |
| | | सत्वम् |

## (क) स्वरसन्धयः

### वृद्धिः

❖ **अधोलिखितानि वाक्यानि पठत –**

1. अरुणाचलः **वनौषधीनां** स्रोतः एव।
2. मयूरः तु **विधात्रैव** पक्षिराजः कृतः।
3. आश्रमे एकः **जनौषधालयः** अस्ति।
4. मानवेषु परस्परं **सदैव** सौहार्दं भवेत्।

❖ **उपरिलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कृत्वा लिखत –**

...................... + ......................    ...................... + ......................

...................... + ......................    ...................... + ......................

**ज्ञातव्यम्**– अ/आ वर्णाभ्यां पश्चाद् यदि ए/ऐ, ओ/औ एतेषु वर्णेषु कश्चिद् वर्णः आगच्छति तर्हि द्वयोः वर्णयोः स्थाने क्रमशः ऐ, औ भवतः।

| | |
|---|---|
| अ / आ + ए / ऐ = ऐ | एक + एकम् = एकैकम्<br>महा + ऐश्वर्यम् = महैश्वर्यम् |
| अ / आ + ओ / औ = औ | जल + ओघः = जलौघः<br>सदा + औदार्यम् = सदौदार्यम् |

❖ **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत –**

1. अहो धृतिः! अहो सत्यम्! अहो **सत्त्वहित + एषिता**। ..................................................

2. शक्रः **तत्र + एव** अन्तर्हितः अभवत्। ............................................................

3. **एकैकपक्षे** ग्रथितं मणीनां तथापि काको न तु राजहंसः। .............................. + ..............................

4. युक्तः नरः क्रोधोद्भवं वेगम् **इह + एव** सोढुं शक्नोति। ............................................................

5. **आत्मैव** ह्यात्मनो बन्धुः। .............................. + ..............................

6. **नैतद्** अस्त्रं प्रयोक्तव्यम्। .............................. + ..............................

7. **मा + एवं** वद। ............................................................

8. भयङ्करः सर्पः **सहसा + एव** बहिरागतः। ............................................................

9. ज्ञानार्जनाय **सदौत्सुक्यं** भवेत्। .............................. + ..............................

10. **तवौदार्यं** जनकल्याणाय भवतु। .............................. + ..............................

## यण्सन्धिः

❖ **अधोलिखितवाक्यानि ध्यानेन पठत –**

1. पाप्मानं प्रजहि **ह्येनं** ज्ञानविज्ञाननाशम्।
2. राज्ञः स्वेषु **गात्रेष्वपि** निरासक्तिः आसीत्।
3. यूथपः कपीन् आहूय **रहस्यवदत्**।
4. तस्य वचनं श्रुत्वा **बुद्धिमत्युवाच**।

❖ **उपरिलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कृत्वा लिखत –**

........................ + ........................ ........................ + ........................

........................ + ........................ ........................ + ........................

**ज्ञातव्यम् –** यत् इ / ई , उ /ऊ, ऋ / ॠ, ऌ इत्येषां वर्णानां पश्चात् कश्चिद् असमानस्वरः भवति, तदा –

| इ / ई | उ / ऊ | ऋ / ॠ | ऌ | |
|---|---|---|---|---|
| ↓ | ↓ | ↓ | ↓ | भवन्ति। |
| य् | व् | र् | ल् | |

**यथा–** हि + अविचारणीया
ह् इ + अविचारणीया
ह् य् + अविचारणीया
= ह्यविचारणीया

वीथिकासु + एव
वीथिकास् + उ + एव
स् व् + एव
= वीथिकास्वेव

पितृ + उपदेशः
पित् ऋ + उपदेशः

ऌ + आकृतिः
ल् + आकृतिः

पित् ऱ् + उपदेश: = लाकृति:

= पित्रुपदेश:

❖ **अधोलिखितानां पदानां सन्धिं सन्धिच्छेदं वा अवधानेन कुरुत –**

1. इच्छत्यात्मन: = ............... + ...............
2. स्वच्छम् = ............... + ...............
3. अभि + उदीरयेत् = .....................
4. साधु + इति = .....................
5. पित्रिच्छा = ..................... + इच्छा
6. लाकार: = ............... + ...............
7. प्रत्येकम् = ............... + ...............
8. मातृ + अंश: = .....................
9. अन्वय: = ............... + ...............
10. सु + आहा = .....................
11. भवत्यधुना = ............... + ...............
12. मात्रधिकार: = ............... + ...............

❖ **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत –**

1. याचका: **सुवर्णादिकानि + अभीष्टानि** वस्तूनि प्राप्तवन्त:। ......................................
2. अहमस्य चक्षुष: **प्रत्यारोपणाय** प्रयतिष्ये। .................... + ...................
3. भरतर्षभ! तस्मात् त्वम् **इन्द्रियाणि + आदौ** नियम्य एनं पाप्मानं प्रजहि। ......................................
4. **मानवेष्वस्त्राणां** प्रयोग: निषिद्ध: आसीत्। .................... + ...................
5. **स्वसृ + आगमनस्य** सूचनां प्राप्य भ्राता प्रसन्नोऽभवत्। ......................................
6. **स्वस्ति** आचार्यपुत्राय। .................... + ...................
7. भरतस्य **भ्रातृ + औदार्यं** जगत्प्रसिद्धम् अस्ति। ......................................
8. द्रौणे: अस्त्रं पाण्डवान् **प्रधक्ष्यति +एव**। ......................................
9. **तेष्वेव** कश्चन बालक: अवदत्। .................... + ...................
10. आचार: प्रथमो धर्म: **इति + एतद्** विदुषां वच:। ......................................

## अयादिसन्धिः

| | | | |
|---|---|---|---|
| ए → अय् | ओ → अव् | ऐ → आय् | औ → आव् |

❖ **अधोलिखितानि वाक्यानि पठत –**

1. विद्या एव वास्तविकं **नयनम्** अस्ति।
2. पश्य पश्य रमणीयं **भवनम्**।
3. अस्य नाटकस्य **नायकः** कः अस्ति ?
4. विशालौ **पर्वताविव**।
5. सह **नाववतु** सह नौ भुनक्तु।

उपरिदत्तेषु वाक्येषु स्थूलानि पदानि सन्धियुक्तानि सन्ति। अस्य सन्धेः नाम **अयादि-सन्धिः** अस्ति।

**अयादिसन्धिः = अय्, अव्, आय्, आव् ( अय् + आदिः = अयादिः सन्धिः। )**

**ज्ञातव्यम् –** ए, ओ, ऐ, औ इत्येतेभ्यः वर्णेभ्यः पश्चाद् यदि कश्चन स्वरवर्णः आगच्छति तर्हि ए, ओ, ऐ, औ इत्येतेषां स्थाने क्रमशः अय्, अव्, आय्, आव् इत्येते भवन्ति।

| पूर्ववर्णः | | परवर्णः | परिवर्तनम् | |
|---|---|---|---|---|
| ए | + | स्वरः | ए स्थाने अय् | ए → अय् + स्वरः |
| ओ | + | स्वरः | ओ स्थाने अव् | ओ → अव् + स्वरः |
| ऐ | + | स्वरः | ऐ स्थाने आय् | ऐ → आय् + स्वरः |
| औ | + | स्वरः | औ स्थाने आव् | औ → आव् + स्वरः |

### उदाहरणानि

**ए + स्वरः = अय् +स्वरः**

**यथा –** ने + अनम् = न् + ए + अनम्
= न् + अय् + अनम् = नयनम्

शे + अनम् = श् + ए + अनम्
= श् + अय् + अनम् = शयनम्

**ओ + स्वरः = अव् +स्वरः**

**यथा –** भो + अनम् = भ् + ओ + अनम्
= भ् + अव् + अनम् = भवनम्

पो + अनः = पवनः

**ऐ + स्वरः = आय् +स्वरः**

| | | | |
|---|---|---|---|
| **यथा –** | नै + अकः | = | न् + ऐ + अकः |
| | | = | न् + आय् + अकः = नायकः |
| | गै + अकः | = | गायकः |

**औ + स्वरः = आव् +स्वरः**

| | | | |
|---|---|---|---|
| **यथा –** | पौ + अकः | = | प् + औ + अकः |
| | | = | प् + आव् + अकः = पावकः |
| | नौ + इकः | = | नाविकः |

## पदान्ते 'य्-व्' वर्णयोः लोपः

| | | | |
|---|---|---|---|
| **यथा –** | हरे + आगच्छ | = | हर् + ए + आगच्छ |
| | | = | हर् + अय् + आगच्छ |
| | | = | हरयागच्छ अथवा हर आगच्छ (य्-लोपः) |
| | श्रियै + अभिलाषः | = | श्रिय् + ऐ + अभिलाषः |
| | | = | श्रिय् + आय् + अभिलाषः |
| | | = | श्रियायभिलाषः / श्रिया अभिलाषः (य्-लोपः) |
| | प्रभो + आगच्छ | = | प्रभ् + ओ + आगच्छ |
| | | = | प्रभ् + अव् + आगच्छ |
| | | = | प्रभवागच्छ / प्रभ आगच्छ (व्-लोपः) |
| | गुरौ + आगते | = | गुर् + औ + आगते |
| | | = | गुर् + आव् + आगते |
| | | = | गुरावागते / गुरा आगते (व्-लोपः) |

**ध्यातव्यम् –** यत्र 'य्-व्'-वर्णयोः लोपः भवति तत्र पुनः सन्धिः न भवति।
यथा 'गुरा आगते' अत्र पुनः सन्धिः न भवति।

❖ **उदाहरणम् अनुसृत्य अधोलिखितेषु सन्धिं कुरुत –**

**यथा –** गुरौ + आगते = गुर् + आव् + आगते = गुरावागते

1. द्वौ + अपि = ........................ + ........................ + ........................ = ........................

2. शिशिरवसन्तौ + इह = ........................ + ........................ + ........................ = ........................

3. ते + आसन् = ..................... + ..................... + आसन् = .....................

4. के + आगच्छन् = ..................... + ..................... + ..................... = .....................

5. हरे + इह = ..................... + ..................... + ..................... = .....................

❖ **सन्धिच्छेदं कुरुत –**

**यथा** – रात्रावागतायाम् = रात्र् + आव् + आगतायाम् = रात्रौ + आगतायाम्

1. उभावपि = .............. + .............. + .............. = .............. + ..............

2. तावत्र = .............. + .............. + .............. = .............. + ..............

3. द्वावपि = .............. + .............. + .............. = .............. + ..............

4. कन्यायायासनम् = .............. + .............. + .............. = .............. + ..............

5. मुनावासीने = .............. + .............. + .............. = .............. + ..............

❖ **अधोलिखितेषु सन्धिं कुरुत –**

1. उभौ + अपि = उभ् + औ + अपि
   = ........ ........ ........ = .............................

2. तौ + अत्र = ........ ........ ........ = .............................
   = ........ ........ ........ = .............................

3. के + आगच्छन् = ........ ........ ........ = .............................
   = ........ ........ ........ = .............................

4. हरे + इह = ........ ........ ........ = .............................
   = ........ ........ ........ = .............................

5. विष्णो + इह = विष्ण् + ओ + इह

❖ **सन्धिच्छेदं कुरुत –**

1. रात्रावागते / रात्रा आगते = ........ + .............

2. द्वावपि / द्वा अपि = ........ + .............

3. मुनावासीने / मुना आसीने = ........ + .............

4. कवयेहि / कव एहि = कवे + .............

5. नाववतु / ना अवतु = नौ + .............

❖ अधोलिखितानां सन्धिं कृत्वा 'य् / व्' वर्णयोः लोपं विकल्पेन प्रदर्शयत –

1. द्वौ + अपि = ................ / .............
2. कस्मै + इति = ................ / .............
3. नद्यै + इह = ................ / .............
4. कवे + इह = ................ / .............
5. हरे + इह = ................ / .............
6. प्रभो + एहि = ................ / .............

## पूर्वरूपसन्धिः

**पदान्ते ए / ओ + अ = ए / ओ + ऽ ( अवग्रहस्य चिह्नम् )**

❖ अधोदत्तान् पद्यांशान् पठत –

1. वेदानां **सामवेदोऽस्मि**।
2. **कीटोऽपि** सुमनः सङ्गादारोहति सतां शिरः।
3. जगद्धिताय जायन्ते मानवाः **केऽपि** भूतले।

एतेषु स्थूलाक्षरपदेषु 'ऽ' इति चिह्नम् अवग्रहः कथ्यते। वस्तुतः अवग्रहः अकारं सूचयति।

उपरिदत्तानि उदाहरणानि पूर्वरूपसन्धेः सन्ति। पूर्वरूपसन्धिः कदा भवति ? आगच्छन्तु, अस्य स्वरूपं जानीयाम।

**यथा** 1. के + अपि
2. कीटो + अपि

अत्र 'ए, ओ' वर्णाभ्यां पश्चात् यः 'अ' वर्णः भवति सः पूर्ववर्णस्य रूपम् एव अङ्गीकरोति – अर्थात् 'अ' वर्णः न दृश्यते अपि च तस्य स्थाने 'ऽ' इति चिह्नं भवति।

अतः 1. के + अपि = के पि = केऽपि
2. कीटो + अपि = कीटो पि = कीटोऽपि

**ध्यानेन पश्यत**

**यथा** – वने + अस्मिन् = वन् (ए + अ) स्मिन् = वन् ए ऽ स्मिन् = वनेऽस्मिन्
प्रभो + अत्र = प्रभ् (ओ + अ) त्र = प्रभ् ओ ऽ त्र = प्रभोऽत्र

❖ उदाहरणानुसारं सन्धिं कुरुत –

| | पूर्वपदस्य अन्तिमस्वरः | उत्तरपदस्य आदिमस्वरः | सन्धिपदम् |
|---|---|---|---|
| वने + अस्मिन् | ए + | अ | वनेऽस्मिन् |
| हरे + अत्र | ए + | अ | हरेऽत्र |
| पुस्तके + अत्र | – | – | – |
| देशे + अभावः | – | – | – |
| विष्णो + अत्र | – | – | – |
| विभो + अस्मान् | – | – | – |
| सेवते + अधुना | – | – | – |
| मोदे + अहम् | – | – | – |
| लज्जते + अयम् | – | – | – |

❖ उदाहरणम् अनुसृत्य सन्धिच्छेदः क्रियताम् –

यथा – केऽपि = के + अपि

1. गृहेऽपि = ........ + .............
2. साधोऽत्र = ........ + .............
3. प्रभोऽनुग्रहः = ........ + .............
4. त्यागेऽपि = ........ + .............
5. परिणामेऽमृतम् = ........ + .............
6. सर्वेऽस्मिन् = ........ + .............

## ( ख ) व्यञ्जनसन्धयः

### जश्त्वसन्धिः

❖ अवधानेन वाक्यानि पठत अवगच्छत च –

1. **जगदीशः** जगत् पालयति।
2. **वागीशः** सर्वं जानाति।
3. अद्य कार्यक्रमे **षड्जनाः** आगच्छन्ति।
4. **सुबन्तानां** पदानाम् एकविंशतिः रूपाणि भवन्ति।
5. **अज्वर्णानां** त्रयो भेदाः भवन्ति।

❖ उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिच्छेदम् अवलोकयत अवगच्छत च –

जगत् + ईशः　　　वाक् + ईशः　　　षट् + जनाः

सुप् + अन्तानाम्　　　अच् + वर्णानाम्

अधः प्रदत्तां तालिकाम् अवगच्छत –

| पूर्वपदस्य अन्तिमाः वर्णाः | | उत्तरपदस्य आदिमाः वर्णाः | | परिवर्तिताः वर्णाः |
|---|---|---|---|---|
| क् | | ग् घ् | | क् → ग् |
| च् | | ज् झ् | | च् → ज् |
| ट् | + | ड् ढ् | स्वराः य् र् ल् व् ह् | ट् → ड् |
| त् | | द् ध् | | त् → द् |
| प् | | ब् भ् | | प् → ब् |

❖ अधोलिखितानां पदानां सन्धिं सन्धिच्छेदं वा कुरुत –

1. सद्गुणाः = ………… + …………
2. अब्जः = ………… + …………
3. षट् + आननः = …………
4. भवत् + आज्ञा = …………
5. तदनुसारः = ………… + …………
6. अजादिः = ………… + …………
7. प्राक् + ऐतिहासिकम् = …………
8. अच् + अन्तः = …………
9. सम्राट् + गच्छति = …………
10. अप् + धिः = …………

❖ अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां सन्धिं सन्धिच्छेदं वा कुरुत –

1. **ऋक् + वेदः** विश्वसाहित्ये आदिमः आलेखः अस्ति। …………………………
2. **धिग्युष्मान्** इति बकः सर्वान् खगान् वदति। ………… + …………
3. जिह्वालोलुपः मेषः यत् पश्यति **तत् + भक्षयति**। …………………………
4. न **कुर्यादहितं** कर्म स परेभ्यः कदाचन। ………… + …………
5. **षट् + ऋतवः** एव संवत्सरस्य नाभयः सन्ति। …………………………
6. अनिच्छन् अपि वार्ष्णेय **बलादिव** नियोजितः। ………… + …………

7. श्रीकृष्णः **विराट् + रूपं** दर्शितवान्। ..........................................

8. **गुप्* + धेनूः** रक्षति। *(रक्षक इत्यर्थे) ..........................................

9. **सम्यगभिज्ञातं** भवता। .................... + ....................

10. कालः भूतं वर्तमानं **भविष्यत् + अपि** जानाति। ..........................................

## परसवर्णसन्धिः

**अधोलिखितम् अनुच्छेदं पठत –**

वर्षतौ आकाशः मेघैः आच्छादितः भवति। ग्रीष्मतापेन तप्ताः नराः **सुखं** लभन्ते। पवनः **मन्दं मन्दं** वहति। **भूमिं** स्नापयन्ति। भूमिः **उष्णं वाष्पं** मुञ्चति। **कृषकाणां** मनः **प्रसन्नं** जायते। प्रकृतिः **हरितं वेशं** धारयति।

उपरि दत्ते अनुच्छेदे स्थूलाक्षरपदेषु अनुस्वारः (—ं) दृश्यते। एषः अनुस्वारः पदान्तमकारस्य स्थाने भवति इति पूर्वं पठितं भवद्भिः। उदाहरणानि पश्यत—

1. शिष्यः **गुरुम्** पृच्छति = शिष्यः **गुरुं** पृच्छति
2. कृषकः **मेघम्** पश्यति = कृषकः **मेघं** पश्यति
3. बालिका **पाठम्** स्मरति = बालिका **पाठं** स्मरति
4. त्वम् **चित्रम्** रचयसि = त्वं **चित्रं** रचयसि

**यदा पदान्तमकारात् परे व्यञ्जनानि भवन्ति तदा मकारस्य स्थाने अनुस्वारः भवति।**

यदि अनुस्वारात् परे अवर्गीय – व्यञ्जनानि भवन्ति, तदा अनुस्वारः एव तिष्ठति, किमपि परिवर्तनं न भवति। किन्तु यदि अनुस्वारात् परतः वर्गीयव्यञ्जनानि भवन्ति, तदा अनुस्वारः अथवा पञ्चमः वर्णः भवति।

कस्य पञ्चमः वर्णः ?

अनुस्वारात् परतः यस्य वर्गस्य वर्णः भवति, तस्य वर्गस्य पञ्चमः वर्णः।

| | | | | |
|---|---|---|---|---|
| —ं | + | क् ख् ग् घ् ङ् | ङ् | अंकः – अङ्कः |
| | | च् छ् ज् झ् ञ् | ञ् | संजयः – सञ्जयः |
| | | ट् ठ् ड् ढ् ण् | ण् | दंडः – दण्डः |
| | | त् थ् द् ध् न् | न् | दंतः – दन्तः |
| | | प् फ् ब् भ् म् | म् | अंबा – अम्बा |

❖ **अधुना उदाहरणानुसारं परसवर्णसन्धिं कुरुत –**

**यथा** राकेशः **विद्यालयम् + गच्छति**। राकेशः विद्यालयं गच्छति / विद्यालयङ्गच्छति।

1. भारत्याः कोषः **सम् + चयात्** नश्यति। .................... / ....................
2. सः एकं **भयम् + करं** दृश्यम् अपश्यत्। .................... / ....................
3. ये अविद्याम् उपासते, ते **अन्धम् + तमः** प्रविशन्ति। .................... / ....................
4. नृपः **रिपुम् + जयति**। .................... / ....................
5. सा **नदीम् + तरति**। .................... / ....................
6. **सम् + गच्छध्वम्**। .................... / ....................
7. अहं **वेदम् + पठामि**। .................... / ....................

## अवधेयम्

♦ पदान्ताद् अनुस्वारात् परतः यः अपि वर्गीयवर्णः भवति, अनुस्वारस्य स्थाने तस्य वर्गस्य पञ्चमवर्णः विकल्पेन भवति, अन्यथा अनुस्वारः एव तिष्ठति। यदि अनुस्वारात् परतः अवर्गीयवर्णः भवति तदा अनुस्वारः एव तिष्ठति।

## अपदान्तानुस्वारः –

यदि अनुस्वारः अपदान्तः भवति तदा वर्गीयवर्णेषु परेषु तस्य स्थाने पञ्चमः वर्णः अनिवार्यत्वेन भवति।

### ❖ अधोलिखितेषु सन्धिं कुरुत –

1. अं + कितः (कवर्गः) = अङ्कितः
2. चं + चलः (चवर्गः) = ....................
3. घं + टा (ट वर्गः) = ....................
4. चं + दनम् (तवर्गः) = ....................
5. चं + पकः (पवर्गः) = ....................

### ध्यानेन पठत

'विद्यालयं + गच्छति' इति प्रथमे उदाहरणे अनुस्वारात् परतः 'ग' वर्णः अस्ति, 'ग' वर्णः कस्य वर्गस्य अस्ति?

कवर्गस्य – | क्, ख्, ग्, घ्, ङ् |

अत्र कवर्गस्य अन्तिमः वर्णः कः अस्ति?

'ङ्' इति।

एषः 'ङ्' वर्णः एव अत्र परसवर्णः मन्यते। अतः अनुस्वारस्य स्थाने 'ङ्' भवति–

**विद्यालयम् + गच्छति = विद्यालयं गच्छति = विद्यालयङ्गच्छति**

## एवमेव

1. भयं + करः इति उदाहरणे अनुस्वारस्य पश्चात् कः वर्णः अस्ति? ..........
   एषः वर्णः कस्य वर्गस्य अस्ति? ..........
   अस्य 'वर्गस्य' अन्तिमः वर्णः कः अस्ति? ..........
   अतः भयं + करः .................... = .................... च भविष्यतः।

2. रिपुं + जयति इति उदाहरणे।

अनुस्वारस्य पश्चात् कः वर्णः अस्ति? ............

एषः वर्णः कस्य वर्गस्य अस्ति? ............

अस्य 'वर्गस्य' अन्तिमः वर्णः कः अस्ति? .....................

अतः रिपुं + जयति = ..................... = ..................... च भविष्यतः।

❖ **परस्वर्ण-नियमस्य तालिकां पूरयत –**

| अनुस्वारसहितपदानि | पूर्वपदस्य अन्तिमः वर्णः | उत्तरपदस्य प्रथमः वर्णः | पूर्वपदस्य स्थाने पञ्चमवर्णः | सन्धियुक्तम् पदम् | विकल्परूपम् |
|---|---|---|---|---|---|
| तृणं + चरति | ं (अनुस्वारः) | च् | ञ् | तृणञ्चरति | तृणं चरति |
| धनं + ददाति | | द् | न् | ............... | धनं ददाति |
| कार्यं + करोति | | क् | ङ् | ............... | कार्यं करोति |
| भोजनं + पचति | | प् | म् | ............... | भोजनं पचति |
| वृक्षं + परितः | | प् | म् | ............... | वृक्षं परितः |
| प्रमाणं + टीकते | | ट् | ण् | ............... | प्रमाणं टीकते |
| वेदं + जानाति | | ज् | ञ् | ............... | वेदं जानाति |

❖ **सन्धिच्छेदम् कुरुत –**

| उदाहरणानि | सन्धिच्छेदः | विकल्परूपम् |
|---|---|---|
| पायसम्भुङ्क्ते | पायसम् + भुङ्क्ते | पायसं भुङ्क्ते |
| भोजनङ्करोति | ..................................... | ..................................... |
| सायङ्कालः | ..................................... | ..................................... |
| तृणञ्ज्वलति | ..................................... | ..................................... |
| विद्यान्धारयति | ..................................... | ..................................... |
| धनन्ददाति | ..................................... | ..................................... |
| शत्रुञ्जयति | ..................................... | ..................................... |

❖ अधः प्रदत्तसूक्तिषु स्थूलाक्षरपदानां सन्धिच्छेदं कुरुत –

1. **किङ्कुलेन** विशालेन विद्याहीनेन जन्तुना। (...............................)
2. नैतदस्त्रं मनुष्येषु प्रयोक्तव्यं **कथञ्चन।** (...............................)
3. **पापिनाञ्च** सदा दुःखम्। (...............................)
4. **विद्वत्वञ्च नृपत्वञ्च** नैव **तुल्यङ्कदाचन।** (...............................) (.................) (.................)

## छत्वसन्धिः

वर्गस्य 1, 2, 3, 4, वर्णाः + श्–स्वराः / य् र् ल् व् ह् / वर्गाणां पञ्चमवर्णाः
= श् ➔ छ्

❖ अधोलिखितानि वाक्यानि पठत –

1. **तच्छरेण** तरुशाखा छिन्ना अभवत्।
2. ईदृशानि कार्याणि कुरु यानि **जगच्छिवानि** भवेयुः।
3. **एतच्छङ्करेण** गीताभाष्ये कथितम्।
4. महात्मानः सर्वेषां कल्याणम् इच्छन्ति, कः **तच्छत्रुः** ?

भवद्भिः दृष्टं यत् स्थूलाक्षरपदेषु 'छ्' इति वर्णस्य (छकारस्य) प्रयोगः वर्तते। एषः 'छ्' वर्णः (छकारः) 'श्' वर्णस्य स्थाने अस्ति। अपि च शकारात् पूर्ववर्तिनः तकारस्य स्थाने 'च्' भवति।

**वर्गीय-प्रथम-द्वितीय-तृतीय-चतुर्थ-वर्णेभ्यः शकारे परे तस्य स्थाने विकल्पेन छकारः भवति, यदि 'श्' वर्णात् परतः स्वराः, य् र् ल् व् ह्, ङ् ञ् ण् न् म् वर्णाः भवेयुः।**

| उदाहरणानि | पूर्वपदस्य अन्तिमः वर्णः | उत्तरपदस्य आदिमः वर्णः | शकारात् परवर्णः | सन्धिपदम् |
|---|---|---|---|---|
| तत् + शिवः | त् | श् | इ | तच्छिवः |
| मत् + शिरः | त् | श् | इ | मच्छिरः |
| जगत् + शत्रुः | त् | श् | अ | जगच्छत्रुः |
| तत् + श्लोकेन | त् | श् | ल् | तच्छ्लोकेन |
| वाक् + शरः | क् | श् | अ | वाक्छरः |
| तत् + शान्तिः | त् | श् | आ | तच्छान्तिः |

❖ उदाहरणम् अनुसृत्य अधोलिखिततालिकां पूरयत –

| पदानि | पूर्वपदस्य अन्तिमः वर्णः | उत्तरपदस्य प्रथमः वर्णः | शकारात् परवर्णः | सन्धिपदम् |
|---|---|---|---|---|
| तत् + शिवः | त् | श् | इ | तच्छिवः |
| मत् + शत्रुः | .................... | .................... | .................... | .................... |
| श्रीमत् + शरच्चन्द्रः | .................... | .................... | .................... | .................... |
| सत् + शीलः | .................... | .................... | .................... | .................... |
| उत् + श्रितम् | .................... | .................... | .................... | .................... |
| त्यागात् + शान्तिः | .................... | .................... | .................... | .................... |
| एतत् + शक्यम् | .................... | .................... | .................... | .................... |
| उत् + श्वासः | .................... | .................... | .................... | .................... |
| हत् + शान्तिः | .................... | .................... | .................... | .................... |
| तत् + श्रुत्वा | .................... | .................... | .................... | .................... |
| सत् + शास्त्रम् | .................... | .................... | .................... | .................... |

## तुगागमः

ह्रस्वस्वरः + छ = ह्रस्वस्वरः + च् + छ्

दीर्घस्वरः + छ = दीर्घस्वरः + छ् दीर्घस्वरः + च् + छ्

❖ अधोलिखितानि वाक्यानि पठत, विशेषतः स्थूलाक्षराणि पदानि –

1. पर्वतीयं वातावरणं **स्वच्छम्** अस्ति।
2. यत्र यत्र **तरुच्छाया** तत्र तत्र पथिकाः।
3. विहगाः गगने **स्वच्छन्दं** विहरन्ति।
4. एकम् **अनुच्छेदं** लिखत।
5. **बदरीच्छायायाम्** उपविश।

अत्र स्थूलपदानां यदि सन्धिच्छेदं कुर्मः तदा वयं द्रक्ष्यामः यत् सन्धिच्छेदरूपे 'च्' इति वर्णः न अस्ति, यथा स्व+छम्, तरु+छाया, स्व+छन्द, अनु+छेदम्।

तदा 'च्' इति वर्णः (चकारः) कुतः आगतः ?

अस्य नियमः अस्ति –

**यदि ह्रस्वस्वरात् परे 'छ्' वर्णः अस्ति, यथा तरु+छाया = त + र् + उ + छाया; अत्र स्वरात् पश्चात् छकारात् च पूर्वं 'च्' वर्णस्य आगमः भवति। यथा– तरुच्छाया इति। किन्तु दीर्घ-स्वरात् परे छकारे आगते छकारात् पूर्वं 'च्' वर्णस्य आगमः विकल्पेन भवति।**

**एवमेव**

| | | |
|---|---|---|
| वृक्ष + छाया | = | वृक्षच्छाया |
| अनु + छेदः | = | अनुच्छेदः |
| वि + छेदः | = | विच्छेदः |
| एक + छत्रम् | = | एकच्छत्रम् |
| स्व + छः | = | स्वच्छः |
| लक्ष्मी + छाया | = | लक्ष्मीच्छाया / लक्ष्मीछाया |

❖ **उदाहरणम् अनुसृत्य सन्धिच्छेदं कुरुत –**

| | | |
|---|---|---|
| **यथा** | तरुच्छायायाम् | तरु + छायायाम् |
| 1. | विच्छेदम् | ...................... |
| 2. | परिच्छेदः | ...................... |
| 3. | अनुच्छेदः | ...................... |
| 4. | कुशलच्छात्रः | ...................... |
| 5. | एकच्छत्रम् | ...................... |

## अनुनासिकसन्धिः

**वर्गीयव्यञ्जनम् + अनुनासिकवर्णः = पञ्चमाक्षरम् + अनुनासिकवर्णः**

**निम्नलिखितम् अनुच्छेदं पठत –**

मम एकं मित्रं **जगन्नाथः** प्रतिदिनं पुस्तकालयं गच्छति। सः तत्र संस्कृत-हिन्दी-आङ्ग्ल-भाषाणां **वाङ्मयं** पठति। सः भारतीयसंस्कृतिमधिकृत्य शोधकार्यं करोति। **तन्मतेन** एतत् कार्यं समाजाय अतीव उपयोगि वर्तते।

उपरि दत्ते अनुच्छेदे स्थूलाक्षरपदानि अनुनासिकसन्धेः उदाहरणानि सन्ति।

के सन्ति अनुनासिकवर्णा: ?

वर्गाणां पञ्चमाक्षराणि ङ् ञ् ण् न् म् वर्णा: अनुनासिकवर्णा: सन्ति।

अधुना अस्य नियमं ज्ञास्याम:

| पूर्वपदस्य अन्तिम: वर्ण: | | उत्तरपदस्य आदिम: वर्ण: | | विकारो भवति | | |
|---|---|---|---|---|---|---|
| क् | | ङ् | | क् → ङ् | | वाक् + मयम् = वाङ्मयम् |
| च् | | ञ् | | च् → ञ् | | |
| ट् | + | ण् | = | ट् → ण् | → | षट् + नवति: = षण्णवति: |
| त् | | न् | | त् → न् | | तत् + मन: = तन्मन: |
| प् | | म् | | प् → म् | | सुप् + मयम् = सुम्मयम् |

वर्गीयव्यञ्जनेभ्य: अनुनासिकवर्णेषु परेषु तस्य व्यञ्जनस्य स्थाने स्ववर्गस्य – पञ्चमाक्षरं भवति, किन्तु एष: नियम: विकल्पेन भवति। यदि प्रत्ययस्य प्रथम: वर्ण: अनुनासिक: भवति, तदा पञ्चमाक्षरं नित्यं भवति।

### उदाहरणानि

1. अहं **वाक् + मयं** पठामि = अहं **वाङ्मयं** पठामि।
2. वयं **जगत् + नाथं** प्रणमाम: = वयं **जगन्नाथं** प्रणमाम:
3. हे प्रभो! मह्यं **सत् +मतिं** देहि = हे प्रभो! मह्यं **सन्मतिं** देहि
4. प्रलयकाले सर्वं विश्वम् **अप् + मयं** भवति = प्रलयकाले सर्वं विश्वम् **अम्मयं** भवति

**अध: दत्तेषु वाक्येषु स्थूलाक्षरम् आश्रित्य सन्धि: विच्छेद: वा क्रियताम्।**

1. सर्वे व्यवहारा: **वाक् + मूला:** सन्ति = .....................
2. **एतत् + न** रोचते = .....................
3. छात्र: **तन्मय:** भूत्वा पठति = ..................... + .....................
4. सभायां **षण्णवति:** नागरिका: तिष्ठन्ति = ..................... + .....................

## ( ग ) विसर्गसन्धिः

### विसर्गस्य उत्वम्

❖ **अधोलिखितानि वाक्यानि ध्यानेन पठत अवगच्छत च –**

1. अपूर्वः **कोऽपि कोशोऽयं** विद्यते तव भारति।
2. **व्ययतो वृद्धिम्** आयाति।
3. अर्थिसमूहः यथेच्छं दानं प्राप्य **सन्तुष्टोऽभवत्**।
4. **को भेदः** बकहंसयोः।
5. **एको मेषः** महानसं प्रविश्य यत्किञ्चिदपि भक्षयति स्म।
6. एतेषां **कलहो न** वानराणां हिताय।

❖ **उपरिलिखितेषु वाक्येषु रेखाङ्कितानां पदानां सन्धिच्छेदम् अवगच्छत –**

| | |
|---|---|
| कः + अपि | कोशः + अयम् |
| व्ययतः + वृद्धिम् | सन्तुष्टः + अभवत् |
| कः + भेदः | एकः + मेषः |
| कलहः + न | |

◆ अत्र वयं पश्यामः यत् रेखाङ्कितपदेषु विसर्गस्य स्थाने 'ओ' इति प्रयुक्तम्। एषः 'ओ' वर्णः अत्र कथम् अभवत् इति अधः प्रदत्तां तालिकां दृष्ट्वा अवगच्छत –

| अः+अ | | | | अः + वर्गीयः तृतीयः, चतुर्थः, पञ्चमः वर्णः य्, व्, र्, ल्, ह् | | | |
|---|---|---|---|---|---|---|---|
| अः | + | अ | कः + अपि | अः | + | भ | कः + भेद |
| अ उ | | अ | क उ + अपि | अ उ | | भ | क उ + भेद |
| ओ | | अ | को + अपि | ओ | | भ | को भेद |
| ओ | | ऽ | कोऽपि | | | | |

❖ **अधः प्रदत्तानि पदानि उदाहरणानुसारं सन्धिं सन्धिच्छेदं वा कृत्वा लिखत –**

**यथा –** पठतः + अपि = पठतोऽपि  कः + जागर्ति = को जागर्ति

1. यः + अकार्यरतः = ......................
2. कालोऽहम् = .................. + ..................
3. कः + अनर्थफलः = ........................
4. विशिष्टो राजपशुः = ................. + ................

5. प्रबन्धः + अपि = ......................

6. शक्यः + भवेत् = ......................

7. स्तब्धो जातः = .................. + ..................

8. वध्यः + असि = ......................

9. ध्यायत : + विषयान् = ......................

10. प्रयुक्तोऽयम् = .................. + ..................

❖ **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. **महाशनः + महापाप्मा** विद्ध्येनमिह वैरिणम्। ......................................................
2. सङ्गात् सञ्जायते कामः, कामात् **क्रोधोऽभिजायते।** ......................... + .........................
3. **चन्द्रो नाम** भूपतिः तत्रावसत्। ......................... + .........................
4. **ज्ञानवृद्धः + बालः** अपि पूजनीयः भवति। ......................................................
5. नीरक्षीरविवेके तु काकः काकः **बकः + बकः**। ......................................................
6. **कुक्कुटोऽपि** जनजागरणं करोति। ......................... + .........................
7. आचारः **प्रथमो धर्मः** इत्येतद् विदुषां वचः। ......................... + .........................
8. देवराजः शक्रः **उपस्थितः + भूत्वा** अवदत्। ......................................................
9. व्यसनं प्राप्य **यो मोहात्** केवलं परिदेवयेत् तस्य क्रन्दनं वर्धते। ......................... + .........................
10. जनकल्याणकर्मसु **रतः + असौ** पुत्रवत् प्रजाः पालयति स्म। ......................................................

## सः / एषः

❖ **एतानि वाक्यानि ध्यानेन पठत अवगच्छत च –**

1. **सोऽपि** बालकः संस्कृतं जानाति।
2. **एषोऽतीव** बुद्धिमान् छात्रः अस्ति।
3. **एषोऽहं** संस्कृतकार्याय सङ्कल्पितोऽस्मि।
4. **सोऽपि** तन्नेत्रं यथास्थानम् अस्थापयत्।
5. **एषोऽध्यक्षः** भाषणं करोति।
6. **सोऽध्ययनाय** प्रतिदिनं विद्यालयं गच्छति।

❖ **उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानां विच्छेदम् अवगच्छत –**

सः + अपि

एषः + अतीव

एषः + अहम्

सः + अपि

एषः + अध्यक्षः

सः + अध्ययनाय

❖ अत्र वयं पश्यामः यत् सः, एषः इत्यनयोः पदयोः विसर्गस्य ( : ) स्थाने 'उ' ( अ + उ = ओ ) प्रयुक्तम् अस्ति।

| | | | | | |
|---|---|---|---|---|---|
| सः | + | अपि | एषः | + | अतीव |
| स उ | + | अपि | एष उ | + | अतीव |
| स् अ उ | | | एष् अ उ | + | अतीव |
| स् ओ | + | अपि | एष् ओ | + | अतीव |
| सो | + | ऽपि | एषो | + | ऽतीव |
| | = | सोऽपि | | = | एषोऽतीव |

❖ अधः प्रदत्तानि पदानि सन्धिं विच्छेदं वा कृत्वा लिखत –

1. सः + अग्रजः = ..............................
2. सोऽपठत् = ............ + ............
3. सः + अत्र = ..............................
4. सोऽन्यथा = ............ + ............
5. सोऽर्जुनः = ............ + ............
6. एषः + अनुजः = ..............................
7. एषोऽलिखत् = ............ + ............
8. एषः + अधुना = ..............................
9. एषोऽधावत् = ............ + ............
10. एषोऽजेयः = ............ + ............

## विसर्गस्य लोपः ( अ )

❖ एतानि अधः प्रदत्तानि वाक्यानि सावधानं पठत –

1. **स बाल्यादेव** वृद्धोपसेवी विनयशीलः च आसीत्।
2. **स राजा** अचिन्तयत्।
3. **एष कामः एष क्रोधः** रजोगुण समुद्भवः।
4. **एष याचकः** धनं याचते।
5. धनस्य निस्सारलघोः **स सारः**।

❖ उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिछेदम् अवगच्छत –

1. सः + बाल्यात्
2. सः + राजा
3. एषः + कामः
4. एषः + क्रोधः
5. एषः + याचकः
6. सः + सारः

❖ अधुना वयं पश्यामः यत् रेखाङ्कितपदेषु 'स, एष' इत्येताभ्यां सह विसर्गः न प्रयुक्तः। किमर्थं तत्र विसर्गः ( : ) न प्रयुक्तः ? इति अधुना जानीमः।

| स: / एष: | + | 'अ' भिन्न: कश्चिदपि वर्ण: | : → | लोप: |
|---|---|---|---|---|

**अत्र ज्ञातव्यम् –** स: / एष: इत्येताभ्यां पश्चात् यदि अकाराद् (अ) भिन्न: य: कोऽपि वर्ण: स्वरवर्ण: व्यञ्जनवर्ण: वा आगच्छति तर्हि स: / एष: इत्यनयो: पदयो: विसर्गस्य लोप: भवति। अपि च विसर्गलोपानन्तरं कश्चिदपि सन्धि: न भवति।

❖ **अध: प्रदत्तानि वाक्यानि सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. स: आगच्छति = ............. .............
2. स पठति = ............. .............
3. स: उद्घोषयति = ............. .............
4. स राजपशु: = ............. .............
5. स: बालसमूह: = ............. .............
6. एष: उपविशति = ............. .............
7. एष क्रीडति = ............. .............
8. एष: इच्छति = ............. .............
9. एष पर्यटनाधिकारी = ............. .............
10. एष: मेष: = ............. .............

❖ **अधोलिखितेषु वाक्येषु रेखाङ्कितानि पदानि सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. **स: + परेभ्य:** कदापि अहितं कर्म न कुर्यात्। = ......................................
2. य: तत्त्वार्थनिर्णयं करोति **स विवेक:** कथित:। = .................. + ..................
3. **एष: + एव** महान् कवि: अस्ति। = ......................................
4. **स: + विकलाङ्गो** भूत्वा चिरं क्लेशम् अनुभवेत्। = ......................................
5. **एष: + महान्** पावनो ग्रन्थ:। = ......................................
6. **स तस्य** आवरणम् अपसारयति। = .................. + ..................
7. **एष: + नकुल:** तव सारथि: भवतु। = ......................................
8. एकदा **स: + द्वारकापुरीम्** आगच्छत्। = ......................................

## विसर्गस्य लोप: (आ)

❖ **अधोलिखितानि वाक्यानि सावधानं पठत –**

1. वाङ्मयं **तप उच्यते**।
2. **नृप आसनम्** अधितिष्ठति।
3. **शक्र ईक्षते** जगत्।
4. विनय**शील एव** ज्ञानं लभते।
5. **अत एव** अहं वदामि।

❖ **अत्र उपरि वाक्येषु रेखाङ्कितानि पदानि सन्ति। यदि वयं ध्यानेन अवलोकयाम: तर्हि अवगच्छाम: यदत्र पूर्वपदस्य अन्ते विसर्ग: न दृश्यते, परं किं तत्र वस्तुत: विसर्ग: नास्ति? विसर्ग: तु अस्ति परन्तु तस्य लोप: (अदर्शनम्) अभवत्। लोप: कथं भवति तालिकां दृष्ट्वा जानीम: –**

| | | | | |
|---|---|---|---|---|
| अः | + | 'अ' भिन्नस्वराः | : → लोपः | |
| तपः | + | उच्यते | | |
| तप् अः | + | उच्यते | | |
| तप् अ | + | उच्यते | = | तप उच्यते |

**अत्र ज्ञातव्यम्** – 'अ'कारात् परं यदि विसर्गः भवति, विसर्गात् परम् अकारम् अतिरिच्य कोऽपि स्वरः भवति तर्हि विसर्गस्य लोपः भवति। अर्थात् विसर्गः न दृश्यते / अपि च विसर्गलोपाद् अनन्तरं पुनः कश्चिदपि सन्धिः न भवति।

❖ **उदाहरणानुसारं प्रदत्तानां पदानां सन्धिविच्छेदं कुरुत –**

**यथा** – नृप आसनम् = नृपः + आसनम्

1. शक्र ईक्षते = ........................ + ........................
2. विनयशील एव = ........................ + ........................
3. अत एव = ........................ + ........................
4. आचार्य उपदिशति = ........................ + ........................
5. अर्जुन उवाच = ........................ + ........................
6. एक एव = ........................ + ........................
7. भवत आदेशः = ........................ + ........................
8. अर्थिन आगच्छन्ति = ........................ + ........................

❖ **अधः वाक्येषु रेखाङ्कितानि पदानि सन्धिं सन्धिच्छेदं वा कृत्वा लिखत –**

1. **यः + इच्छत्यात्मनः** श्रेयः। ..........................
2. **काम एषः क्रोध एषः** रजोगुणसमुद्भवः। .................... + .................... ..........................
3. छात्रेभ्यः **काकः + आदर्श** एव। ..........................
4. आयुषः **क्षण एकोऽपि** न लभ्यः स्वर्णकोटिकैः। ..........................
5. **हंसः + एव** नीरक्षीरविवेकी मन्यते। ..........................

## विसर्गस्य लोपः ( इ )

| | | | |
|---|---|---|---|
| आः | + | स्वरवर्णाः<br>वर्गीयः तृतीयः, चतुर्थः, पञ्चमः वर्णः<br>य् , व् , र् , ल् , ह् | : → लोपः |

यथा – पाठकाः + गुणाः

पाठक् आः + गुणाः

पाठक् आ + गुणाः = पाठका गुणाः

**ज्ञातव्यम् –** 'आ' वर्णात् परं यदि विसर्गः स्यात् विसर्गात् परं च कश्चिदपि स्वरः, वर्गीयः तृतीयः चतुर्थः पञ्चमः वर्णः, य् व् र् ल् ह् एतेषु कश्चन वर्णः आगच्छति तर्हि विसर्गस्य (:) लोपः भवति।

विसर्गलोपाद् अनन्तरं पुनः कश्चिदपि सन्धिः न भवति।

❖ **उदाहरणानुसारं प्रदत्तपदानां सन्धिं सन्धिच्छेदं वा कुरुत –**

यथा – **एताः + अजन्ता** गुहाः। एता अजन्तागुहाः

**समृद्धा दानशालाः** = समृद्धाः + दानशालाः

1. ताः + महिलाः = ..............................
2. जिह्वालोलुपा वानराः = .................... + ....................
3. पुत्राः + भ्रातरः = ..............................
4. शैला विदीर्यन्ते = .................... + ....................
5. बालकाः + अवदन् = ..............................
6. नद्या उद्गमस्थलम् = .................... + ....................
7. गणनायाः + आधारः = ..............................
8. सज्जना एव = .................... + ....................
9. प्रमुखाः + उत्सवाः = ..............................
10. पञ्चाशदधिका नद्यः = .................... + ....................

❖ **अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां सन्धिं विच्छेदं कुरुत –**

1. **अमात्याः + विषण्णाः** अभवन्। = ..............................
2. **एकस्या लघुनाटिकायाः** प्रस्तुतिं करिष्यामः। = .................... + ....................
3. ज्वालमाला**कुलाः + अश्वाः** इतस्ततः अधावन्। = ..............................
4. अस्माभिः **अवधीरिता गुरूपदेशाः**। = .................... + ....................
5. द्रौपद्याः **पुत्राः + वीरगतिं** प्राप्ताः। = ..............................
6. गगनात् सहस्रशः **उल्काः + भूमौ** पतन्ति। = ..............................
7. अये! कथमिमं सङ्कल्पं श्रुत्वा **विस्मिता यूयम्**। = .................... + ....................
8. **द्वादशमासाः + एव** अक्षत्वेन गण्यन्ते। = ..............................
9. एते पाषाणाः किमपि **वक्तुकामा एव**। = .................... + ....................
10. लोहितजनपदे अपि अनेके **बोधविहाराः + वर्तन्ते**। = ..............................

## विसर्गस्य रत्वम् ( अ )

❖ **अधोलिखितानि वाक्यानि सावधानं पठत अवगच्छत च –**

1. लोके **चक्षुर्दानं** दुष्करम् एव।
2. **सहस्रांशुर्न** भासते।
3. रमणीया हि **सृष्टिरेषा**।
4. अहं बकः एव **वृष्टेरभिनन्दनं** करोमि।
5. कः **शुचिरिह**? यस्य मानसं शुद्धम्।
6. मनसः निग्रहं **वायोरिव** सुदुष्करम्।

❖ **उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानि अधः प्रदत्तेषु रिक्तस्थानेषु लिखत –**

.................................... .................................... ....................................

.................................... .................................... ....................................

❖ **अधुना एतेषां पदानां सन्धिच्छेदं पश्यत अवगच्छत च –**

| | |
|---|---|
| चक्षुः + दानम् | सहस्रांशुः + न |
| सृष्टिः + एषा | वृष्टेः + अभिनन्दनम् |
| शुचिः + इह | वायोः + इव |

❖ **अत्र ज्ञातव्यं यत्** 'अ/आ' वर्णौ अतिरिच्य भिन्नस्वरेभ्यः पश्चात् यदि विसर्गः (ः) भवति, विसर्गात् परं च कश्चन स्वरः, वर्गीयः तृतीयः, चतुर्थः, पञ्चमः वर्णः, य् व् र् ल् ह् एतेषु कश्चन वर्णः आगच्छति तर्हि विसर्गस्य (ः) स्थाने 'र्' भवति।

| | | | | |
|---|---|---|---|---|
| अ / आ भिन्न स्वराः | ः | + | स्वराः<br>वर्गीयः तृतीयः,<br>चतुर्थः, पञ्चमः वर्णः,<br>य् , व् , र् , ल् , ह् | ः → र् |

**यथा –**

| | |
|---|---|
| पितुः + उपदेशः | परैः + न |
| पित् उः + उपदेशः | पर् ऐः + न |
| पित् उ र् + उपदेशः | पर् ऐ र् + न |
| = पितुरुपदेशः | = परैर्न |

❖ **अधः प्रदत्तानां पदानां सन्धिं विच्छेदं वा कुरुत –**

1. चक्षुः + हीनः = ........................
2. प्रकृतिः + एव = ........................
3. उच्चैः + अक्रन्दत् = ........................
4. संस्कृतिः + अपि = ........................

5. विविधैः + भोग्यपदार्थैः = ..............................   6. शनैर्गच्छ = ............ + ............

7. मातुराज्ञा = ............ + ............   8. वाक्पटुर्धैर्यवान् = ............ + ............

9. भूमिरियम् = ............ + ............   10. पितुर्द्रोणात् = ............ + ............

❖ **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. अहं भवते **चक्षुर्द्वयमेव** प्रयच्छामि। = ........................... + ...........................
2. **प्रकृतिरेव** सर्वेषां जननी अस्ति। = ........................... + ...........................
3. **सर्वैरेव** मे शोभा। = ........................... + ...........................
4. ज्ञानवृद्धः बालोऽपि **सर्वैर्वन्द्यः** भवति। = ........................... + ...........................
5. पुष्पाणां **सुगन्धिः + मनोहरः**। = ......................................................
6. **सुन्दरैः + अक्षरैः + लिखितम्**। = ......................................................
7. **गुरुः + ब्रह्मा गुरुर्विष्णुः गुरुर्देवः** महेश्वरः। = ......................................................
   = ........................... + ...........................
   = ........................... + ...........................
8. भारतीयमासानां नामानि **नक्षत्रनामभिः + एव** सम्बद्धानि। = ......................................................

## अव्ययसम्बद्धविसर्गस्य रत्वम् ( आ )

क्वचित् अव्ययसम्बद्धविसर्ग ( : ) + स्वराः / वर्गीयः तृतीयः, चतुर्थः, पञ्चमवर्णः / य् व् र् ल् ह् = विसर्गस्य ( : ) 'र्'।

**यथा** – पुनः + अत्र = पुनरत्र

1. प्रातः + गच्छति = ...........................   2. पुनः + देवराजः = ...........................

3. शनैः + याति = ...........................   4. प्रातः + उतिष्ठति = ...........................

5. अन्तर्हितः = ............ + ............   6. प्रातरुदेतिः = ............ + ............

7. पुनरास्ते = ............ + ............   8. प्रातर्वन्दनीयः = ............ + ............

अत्र विसर्गस्य स्थाने रत्वम् (र्) अभवत् यतः सर्वत्र अव्ययपदम् अस्ति। क्वचित् अव्ययेन सह विसर्गस्य रत्वम् (र्) एव भवति।

## विसर्गस्य शत्वम्

: + श् / च् / छ् = : ➔ श्

**यथा –** धनुः + चक्रम्

धनु श् + चक्रम् = धनुश्चक्रम्

**अत्र ध्यातव्यम् –** विसर्गात् परं यदि श्, च्, छ् आगच्छन्ति तर्हि विसर्गस्य (:) स्थाने 'श्' भवति।

❖ **रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. ब्रह्मणः <u>**आयुश्शतं**</u> वर्षाणि। = ........................ + ........................
2. <u>**कः + चन**</u> विद्वान् सङ्कल्पवाचनं करोति। = ....................................................
3. कालः <u>**अखण्डः + शाश्वतः**</u> <u>**विभुश्च**</u>। = ....................................................
   = ........................ + ........................
4. बालकाः <u>**बालिकाश्च**</u> देवालयं दृष्ट्वा मन्त्रमुग्धाः। = ........................ + ........................
5. <u>**शनैश्शनैः**</u> प्रभूतं धनमर्जितवान्। = ........................ + ........................
6. श्रीकृष्णार्जुनौ <u>**युधिष्ठिरः + च**</u> प्रविष्टवन्तः। = ....................................................
7. प्रधानाचार्यः, पर्यटनाधिकारी, <u>**अध्यापकाश्च**</u> मञ्चे सन्ति। = ........................ + ........................
8. द्रौपद्याः पुत्राः <u>**भ्रातरः + च**</u> द्रौणिना हताः। = ....................................................

## विसर्गस्य षत्वम्

: + ष् ट् ठ् = : ➔ ष्

**यथा –** धनुः + टङ्कारः

धनु ष् + टङ्कारः = धनुष्टङ्कारः

**अत्र ध्यातव्यम् –** विसर्गात् परं यदि ट् ठ् ष् आगच्छन्ति तर्हि विसर्गस्य (:) स्थाने 'ष्' भवति।

❖ **अधोलिखितानि सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. डयमानः + टिट्टिभः = ....................
2. चतुष्षष्टिः = .................... + ....................

3. रूप्यकैष्ठनठनायते = ........................ + ........................

4. देवेन्द्रः + टीकते = ........................

5. श्लोकष्षष्ठः = ........................ + ........................

## विसर्गस्य सत्वम्

: + स् त् थ् = : → स्

**यथा** – ऋग्वेदः + तु

ऋग्वेद स् + तु = ऋग्वेदस्तु

**अत्र ध्यातव्यम्** – विसर्गात् परं यदि स् त् थ् आगच्छन्ति तर्हि विसर्गस्य (:) स्थाने 'स्' भवति।

❖ **रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. मम **अर्थिनः + तु** धनलाभमात्रेण सन्तोषं भजन्ते। = ........................
2. कः + स्यात् **पापतरस्ततः** ? = ........................ + ........................
3. देशान्तरेभ्योऽपि **जनाः + तं** देशमायान्ति स्म। = ........................
4. शक्रोऽहमस्मि **देवेन्द्रस्त्वत्समीपम्** उपागतः। = ........................ + ........................
5. **शक्रः + तत्रैव** अन्तर्हितः अभवत्। = ........................
6. का नु **हानिस्ततो**ऽधिका। = ........................ + ........................
7. राजहंसः राजहंसी च **सरः + तीरे** विहरतः। = ........................
8. ध्यायतो विषयान् पुसः **सङ्गस्तेषु** उपजायते। = ........................ + ........................
9. पिताऽस्य किं **तपस्तेपे इत्युक्तिः + तत्कृतज्ञता**। = ........................ + ........................ = ........................
10. श्रीकृष्णस्य चक्रं दृष्ट्वा **रिपुभिः + थरथरायते**। = ........................